শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে

# ॥ অষ্টষষ্টিতমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ অষ্টষষ্টিতমঃ সর্গঃ ॥

## জনকস্য সন্দেশমাকর্ণ্য মন্ত্রিভিঃ সহিতস্য রাজ্ঞো দশরথস্য মিথিলাং গন্তুমুদ্যমঃ

জনকেন সমাদিষ্টা দূতাস্তে ক্লান্তৱাহনাঃ।
ত্রিরাত্রমুষিতা মার্গে তেঽযোধ্যাং প্রাৱিশন্ পুরীম্॥ **1.68.1** ॥

তে রাজৱচনাদ্ গৎৱা রাজৱেশ্ম প্রৱেশিতাঃ।
দদৃশুর্দেৱসঙ্কাশং ৱৃদ্ধং দশরথং নৃপম্॥ **1.68.2** ॥

বদ্ধাঞ্জলিপুটাঃ সর্ৱে দূতা ৱিগতসাধ্ৱসাঃ।
রাজানং প্রশ্রিতং ৱাক্যমব্রুৱন্ মধুরাক্ষরম্॥ **1.68.3** ॥

মৈথিলো জনকো রাজা সাগ্নিহোত্রপুরস্কৃতঃ।
মুহুর্মুহুর্মধুরযা স্নেহসংরক্তযা গিরা॥ **1.68.4** ॥

কুশলং চাৱ্যযং চৈৱ সোপাধ্যাযপুরোহিতম্।
জনকস্ত্ৱাং মহারাজ পৃচ্ছতে সপুরঃসরম্॥ **1.68.5** ॥

পৃষ্টৱা কুশলমৱ্যগ্রং ৱৈদেহো মিথিলাধিপঃ।
কৌশিকানুমতে ৱাক্যং ভৱন্তমিদমব্রৱীৎ॥ **1.68.6** ॥

পূর্ৱং প্রতিজ্ঞা ৱিদিতা ৱীর্যশুল্কা মমাত্মজা।
রাজানশ্চ কৃতামর্ষা নির্ৱীর্যা ৱিমুখীকৃতাঃ॥ **1.68.7** ॥

সেযং মম সুতা রাজন্ ৱিশ্ৱামিত্রপুরস্কৃতৈঃ।
যদৃচ্ছযাগতৈ রাজন্ নির্জিতা তৱ পুত্রকৈঃ॥ **1.68.8**॥

তচ্চ রত্নং ধনুর্দিৱ্যং মধ্যে ভগ্নং মহাত্মনা।
রামেণ হি মহাবাহো মহত্যাং জনসংসদি॥ **1.68.9**॥

অস্মৈ দেযা মযা সীতা ৱীর্যশুল্কা মহাত্মনে।
প্রতিজ্ঞাং তর্তুমিচ্ছামি তদনুজ্ঞাতুমর্হসি॥ **1.68.10**॥

সোপাধ্যাযো মহারাজ পুরোহিতপুরস্কৃতঃ।
শীঘ্রমাগচ্ছ ভদ্রং তে দ্রষ্টুমর্হসি রাঘৱৌ॥ **1.68.11**॥

প্রতিজ্ঞাং মম রাজেন্দ্র নির্ৱর্তযিতুমর্হসি।
পুত্রযোরুভযোরেৱ প্রীতিং ৎৱমুপলপ্স্যসে॥ **1.68.12**॥

এৱং ৱিদেহাধিপতির্মধুরং ৱাক্যমব্রৱীৎ।
ৱিশ্ৱামিত্রাভ্যনুজ্ঞাতঃ শতানন্দমতে স্থিতঃ॥ **1.68.13**॥

দূতৱাক্যং তু তচ্ছ্রুৎৱা রাজা পরমহর্ষিতঃ।
ৱসিষ্ঠং ৱামদেৱং চ মন্ত্রিণশ্চৈৱমব্রৱীৎ॥ **1.68.14**॥

গুপ্তঃ কুশিকপুত্রেণ কৌসল্যানন্দৱর্ধনঃ।
লক্ষ্মণেন সহ ভ্রাত্রা ৱিদেহেষু ৱসত্যসৌ॥ **1.68.15**॥

দৃষ্টৱীর্যস্তু কাকুৎস্থো জনকেন মহাত্মনা।
সম্প্রদানং সুতাযাস্তু রাঘৱে কর্তুমিচ্ছতি॥ **1.68.16**॥

যদি ৱো রোচতে ৱৃত্তং জনকস্য মহাত্মনঃ।
পুরীং গচ্ছামহে শীঘ্রং মা ভূৎ কালস্য পর্যযঃ॥ **1.68.17**॥

মন্ত্রিণো বাঢমিত্যাহুঃ সহ সর্ৱৈর্মহর্ষিভিঃ।
সুপ্রীতশ্চাব্রৱীদ্ রাজা শ্ৱো যাত্রেতি চ মন্ত্রিণঃ॥ **1.68.18**॥

মন্ত্রিণস্তু নরেন্দ্রস্য রাত্রিং পরমসৎকৃতাঃ।
ঊচুঃ প্রমুদিতাঃ সর্ব্বে গুণৈঃ সর্ব্বৈঃ সমন্বিতাঃ॥ **1.68.19**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাব্যে বালকাণ্ডে অষ্টষষ্টিতমঃ সর্গঃ॥